**कौशपर्स्य** पु० कौशः तल्लोमेव पर्णमस्य । अपामार्गे शब्दर० । जातित्वेन ङीष् । कौशपर्णीत्यप्यत्र अमरः

**कु** शब्दे वर्णे च भ्वा० आत्म० अक० अनिट् कवते अकोष्ट चुकुवे प्रनिकवते

**कु** आर्त्तस्वरे तुदा० आत्म० अ० क० अनिट् । कुटादि । कुवते [अकोष्ट चुकाव

**कु** शब्दे अदा०पर०अक०अनिट् । कौति अकौषीत् चुकाव

**कु** अव्य० कु+डु । १पापे, २निन्दायाम्, ३ईषदर्थे, ४निवारणे च । ५भूमिभागे ६धरायाञ्च स्त्री । कुत्सितार्थत्वे ईषदर्थत्वे चास्य "कुगतिप्रादयः" "पा० समर्थेन नित्यसमासः कुरूपम् कुदेशः तत्रायं भेदः तत्पुरुषे अजादौ शब्दे-परे कोः कत् । कुत्सितोऽश्वः कदश्वः कदन्नम्कदध्वः कदग्निः ।"रथवदयोश्च"पा०कद्रथः कद्वदः"तृणे च जातौ"पा० कत्तृणम् पथिशब्दे कृतसमासान्ताक्षशब्दे परे च कादेशः कापथः काक्षः । ईषदर्थस्य कोः का, ईषज्जलं काजलम् पुरुषे परे का वा ईषत् पुरुषः कुपुरुष कापुरुषः । उष्णे उक्तत्रयादेशः कोष्णं कवोष्णं कदुष्णम्" गतिप्रादिसाहचर्यात् अव्ययस्यैवेह ग्रहणात् न भूमिवाचस्य नित्यसमासः नवा कदादेशः अव्ययपूर्व्वकत्वात् प्रकृतिस्वरः, "राहुः कुभामण्डलगः शशाङ्कं ग्रस्ते""ज्यो०ब्राह्मण इव कुशासनसहितः" काद० । कुदिनम् कुजः अव्ययस्य वेदे दीर्घः"कूष्ठोदेवावश्विनाद्याद्दिवोमनावसू" ऋ०५,७४,१ ।

**कुंसा** स्त्री कुसि—भावे अ । १भाषणे २ज्ञापने च

**कुक** आदाने भ्वा० आत्म०सक० सेट् । कोकते । अकोकिष्ट । चुकुके कोकः' प्रनिकोकते

**कुक** त्रि० कुक—क । १समर्थे २आदायिनि च ।

**कुकभ** न० कुकस्य भा यत्र । मद्ये शब्दच० । तत्पानस्य सामर्थ्याघायकत्वात् तथात्वम्

**कुकर** पु० कुत्सितःआदानादिमान्द्ययुक्तः करोयस्मात् । करस्य क्रियामान्द्यसम्पादके कुणिरोगे अमरः । ब०ब० २तद्रोगयुक्ते त्रि० । कु+क्न—ट । ३कुकर्म्मकारके त्रि० ।

**कुकर्म्मन्** न० कुत्सितं कर्म्म नित्यस० । १लोकशास्त्रनिन्दिते कर्म्मणि ब०व० । २तद्युक्ते त्रि० स्त्रियां वा डाप्

**कुकील** पु० कोः पृथिव्या । कीलइव । पर्व्वते त्रिका० तस्य भूमौ कीलरूपेणावस्थानात् तथात्वम्

**कुकुट** पु०कौ कुटति कुट—क, कोः कुटइव वा । (सुषुणि) इतिख्याते शाकभेदे राजनि० तस्य पृथिव्याः कुटतुल्यत्वात् तथात्वम्

**कुकु(कू)द** पु० कोः पृथिव्याः कुद ईषद्दः । सत्कृतालङ्कृतायाः कन्याया दातरि पृषो० दीर्घपाठः इत्यन्ये । कन्यादस्य ईषद्भूमिदानसमत्वात्तस्य तथात्वम् । सत्कृतालङ्कृतां कन्यां ददानः ककुदः स्मृतः" अमरे पाठान्तरम् अत्र प्रसिद्धपदसान्निध्यात् कुकुदपदस्य उक्तार्थे शक्तिग्रह इति शब्द० प्र० । प्रसिद्धपदसान्निध्यञ्च प्रसिद्धार्थपदसामानाधिकरण्यम् सामानाधिकरण्यञ्च अभेदेनान्वयबोधकत्वम् । न्यायमते तिङर्थस्याभेदेन प्रथमान्तार्थे अन्वयासम्भवेन "यो ददाति स कुकु(कू)दः इत्यमर पाठे स्थिते ददातीतिस्थाने ददान इति पाठः कल्पितः । व्याकरणमते तु तिङन्तार्थस्य प्रथमान्तार्थेऽभेदेनान्वयस्वीकारान्न यथाश्रुतपाठेऽपि क्षतिः । विवेचितं चैतदस्माभिः शब्दार्थरत्ने तत्र एव तदवसेयम् ।

**कुकुन्दर** पु० कुं भूमिं दारयति अन्तर्भूतण्यर्थे दृ—अण् नि० कुत्सितं कुन्दरमत्र, स्कुद्यते कामिनाऽत्र स्कुद् नि० वा । स्त्रीणां १नितम्बस्थे आवर्त्ताकारे पृष्ठवंशादधोबर्त्तिगर्त्तद्वये । अमरः । (कुकुरसोङ्गा) २वृक्षे भावप्र० ।

**कुकुभा** स्त्री रागिणीभेदे हलायुधः ।

**कुकुर** पु ०कुं पृथिवी० कुरति त्यजति स्वामित्वेन कुर—क । यदुवंशीयन्टपभेदे तेषां ययातिशापात् राज्यं नास्तीति पुराणकथा यदुशब्दे दृश्या । "विधुरि ता धुरिताः"कुकुरस्त्रिय" माघः । २दशार्हे देशभेदे पु० ब०व० । कुक—उरच् किच्च । ३कुक्कुरे हड्डचन्द्रः । ४ग्रन्थिपर्णौ-षधौ त्रिका० । कुकुरन्टपस्यान्धकपुत्रभेदः । "कुकुरः भजमानशुचिकम्बलबर्हिषास्तथान्धकस्य पुत्राः" इति विष्णुपु० "कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः । "अन्धकात् काश्यदुहिता चतुरोलभतात्मजान् कुकुरं भजमानं च शमं कम्बलबर्हिषम्" हरिवं० ३८अ० तदधिष्ठानदेशभेदश्च दशार्हः ।

**कुकूटी** स्त्री कोः पृथिव्याः कूटोऽस्त्यस्याः अच् गौरा०ङीष् । शाल्मलीवृक्षे राजनि० तस्या दीर्घतया भूमिकूटतुल्यत्वात्तथात्वम् ।

**कुकूल** पु० कोः भूमेः कूलं, कुत्सितं वा कूलम् कु—ऊलच् धातोः कुगागमश्च वा । १तुषानले २शङ्कुभिः सङ्कीर्णे २गर्त्ते ३वर्म्मणि च अमरः । "शिरीषादपि मृद्वङ्गी क्वेयमायतलोचना । अयं क्व च कुकूलाग्निः कर्कशो मदनाऽनलः" ।

**कुकोल** न० कुत्सितं कोलति कुल—अच् । कोलिवृक्षे । शब्दच० ।

**कुक्कुट** पुंस्त्री०कुक—सम्प०क्विप् कुका आदानेन कुटति कुट—